# पञ्चमः पाठः    भ्रान्तो बालः

## स्मरणीय तथ्य

- जीवन के लक्ष्य को प्राप्त करने के लिए अथवा सफलता प्राप्त करने के लिए समय का अनुपालन एवम् उसका सदुपयोग परम आवश्यक है।
- प्रस्तुत पाठ "भ्रान्तो बालः" 'संस्कृत प्रौढपाठावलिः' नामक ग्रन्थ से लिया गया है। इसमें एक ऐसे बालक का चित्रण किया गया है, जिसका मन अध्ययन की अपेक्षा खेल-कूद में अत्यधिक लगा रहता है। यहाँ तक कि वह खेलने के लिए पशु-पक्षियों तक को अपना मित्र बनाना चाहता है किन्तु कोई भी उसके साथ खेलने के लिए तैयार नहीं होता। इससे वह बहुत निराश होता है। अन्ततः उसे बोध होता है कि सभी अपने-अपने कार्यों में व्यस्त हैं, केवल वही बिना किसी काम के इधर-उधर घूमता रहता है। अतः वह निश्चय करता है कि अब व्यर्थ में समय गँवाना छोड़कर समय का सदुपयोग करेगा।

## बहुविकल्पात्मकाः प्रश्नाः-

**1. बालः कीदृशः आसीत् ?**
क. सुशीलः    ख. भ्रान्तः
ग. कुशाग्रबुद्धिः    घ. दीर्घः

**2. बालः पाठशालागमनवेलायां कुत्र अगच्छत् ?**
क. क्रीडितुम्    ख. खादितुम्
ग. हसितुम्    घ. द्रष्टुम्

**3. बालः कस्याः गमनवेलायां क्रीडितुम् अगच्छत् ?**
क. गृहस्य    ख. पाठशालायाः
ग. हट्टस्य    घ. भ्रमणस्य

**4. के पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय तत्पराः अभवन् ?**
क. बालस्य पिता    ख. बालस्य माता
ग. बालस्य भ्राता    घ. बालस्य सहपाठिनः

**5. कः एकाकी किमपि उद्यानं प्राविशत् ?**
क. बालः    ख. मित्रम्
ग. जननी    घ. जनकः

**6. 'कः + अपि' इत्यस्य सन्धि-पदम् किम् ?**
क. कौऽपी    ख. कोऽपि
ग. काऽपि    घ. कअपि

**7. 'क्रीड् + तुमुन्' इत्यस्य कः शब्दः निष्पन्नः ?**
क. क्रीडः    ख. क्रीडित्वा
ग. क्रीडितुम्    घ. क्रीडितः

**8. 'पाठान्' पदे का विभक्तिः अस्ति ?**
क. द्वितीया    ख. पञ्चमी
ग. प्रथमा    घ. षष्ठी

**9. तन्द्रालुः पदं कस्मै प्रयुक्तम् ?**
क. बालाय    ख. कुक्कुराय
ग. मधुकाराय    घ. चटकायै

**10. 'विरमन्तु एते वराकाः पुस्तकदासाः' इति कः अचिन्तयत् ?**
क. मित्रम्    ख. बालकः
ग. कुक्कुरः    घ. खगाः

**11. 'विरमन्तु एते वराकाः पुस्तकदासाः' अस्मिन् वाक्ये 'पुस्तकदासाः' इत्यस्य विशेषण-पदं किम्?**
क. विरमन्तु    ख. पुस्तकम्
ग. वराकाः    घ. दासाः

**12. तन्द्रालुः बालः लज्जया एकाकी कुत्र प्राविशत् ?**
क. गृहम्    ख. विद्यालयम्
ग. वनम्    घ. उद्यानम्

**13. 'अहम् तु आत्मानं विनोदयिष्यामि' अत्र 'अहम्' पदम् कस्मै प्रयुक्तम्?**
क. भ्रमराय    ख. खगाय
ग. मोहनाय    घ. बालाय

**14. 'आगत्य' इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम्?**
क. समाविशतु    ख. प्रतिदिनम्
ग. गत्वा    घ. आदाय ।

**15. 'व्रजन्तम्' इत्यस्य पर्याय - पदं किं प्रयुक्तम् ?**
क. गच्छन्तम्    ख. अप्रियम्
ग. हसन्तम्    घ. कषायः

**16. 'मधुकरम्' इत्यस्मिन् अर्थे अत्र किं पदं प्रयुक्तम्?**
क. खगम्    ख. भ्रमरम्
ग. मानवः    घ. वृक्षम्

**17. 'पक्षिणः' इत्यस्मिन् पदे किं वचनम् ?**
क. एकवचनम्    ख. बहुवचनम्
ग. द्विवचनम्    घ. किमपि न

**18. 'एते पक्षिणो मानुषेषु नोपगच्छन्ति ' इत्यनुसारं के मानुषेषु न उपगच्छन्ति?**
क. पक्षिणः    ख. कुक्कुराः
ग. सर्पाः    घ. पुरुषाः

**19. 'प्रीतः बालः तं इत्थं समबोधयत्' अत्र विशेष्य -पदं किम् ?**
क. प्रीतः    ख. तम्
ग. इत्थम्    घ. बालः

**20. 'अथ स्वोचितम् अहमपि करोमि।' अत्र 'अहम्' इति**

कर्तृ- पदस्य क्रियापदं किम् ?

क. अथ ख. स्वोचितम्

ग. करोमि घ. अपि

**21. 'कुक्कुरः प्रत्यवदत्- यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य...' अस्मिन् वाक्ये कः प्रत्यवदत् ?**

क. बालः ख. कुक्कुरः

ग. माम् घ. स्वामिनो

**22. सर्वैः निषिद्धः सः बालः कीदृशः जातः ?**

क. आक्रोशितः ख. भग्नमनोरथः

ग. प्रसीदः घ. उत्तेजितः

**23. 'नोपगच्छन्ति' इत्यस्य सन्धि-विच्छेदः कः?**

क. न +उपगच्छन्ति ख. नोप + गच्छन्ति

ग. नोपग + छन्ति घ. नौ + गच्छन्ति

**24. कैः एवं निषिद्धः स बालः भग्नमनोरथः जातः ?**

क. खगैः ख. कुक्कुरैः

ग. सर्वैः घ. भ्रमरैः

**25. "न कोऽपि मामिव वृथा...... सहते।' रिक्त-स्थानं पूरयत-**

क. वनम् ख. कालक्षेपम्

ग. वृक्षम् घ. भोजनम्

**26. 'प्रीतः बालः तम् इत्थं समबोधयत्' अस्मिन् वाक्ये अव्यय-पदं किम् अस्ति?**

क. प्रीतः ख. इत्थम्

ग. समबोधयत् घ. बालः

**27. बालः त्वरितं कुत्र अगच्छत् ?**

क. पर्वतम् ख. वनम्

ग. पाठशालाम् घ. साधुकुटीरम्

**28. 'ततः प्रभृति स विद्याव्यसनी भूत्वा महतीं वैदुषीं प्रथां सम्पदम् च अलभत ' इत्यनुसारं स बालः कीदृशः भूत्वा महतीं वैदुषीं अलभत?**

क. विद्याव्यसनी ख. वैदुषीम्

ग. खिन्नः घ. प्रथाम्

**29. 'महतीं वैदुषीं प्रथां सम्पदं च अलभत' अत्र क्रिया-पदं किमस्ति?**

क. प्रथां ख. सम्पदम्

ग. अलभत घ. महतीं

**30. "वैदुषीं प्रथां सम्पदं च अलभत' अत्र 'धनम्' इत्यर्थे कः शब्दः आगतः?**

क. वैदुषीम् ख. सम्पदम्

ग. च घ. प्रथाम्

**31. "पलायमानं कमपि श्वानम् अवलोकयत्।" अत्र `कुक्कुरम्' इत्यर्थे किं पदं प्रयुक्तम् ?**

क. पलायमानम् ख. कमपि

ग. अवलोकयत् घ. श्वानम्

**32. "वयं हि मधुसङ्ग्रहव्यग्राः" इति कः अगायत् ?**

क. मधुकरः ख. गायकः

ग. खेचरः घ. चटकः

**33. बालः चञ्च्वा तृणशलाकादिकम् आददानम् एकं कम् अपश्यत् ?**

क. भ्रमरं ख काकम्

ग. कुक्कुरम् घ. चटकम्

## बहुविकल्पात्मक-प्रश्नानाम् उत्तराणि

1. ख. भ्रान्तः
2. क. क्रीडितुम्
3. ख. पाठशालायाः
4. घ. बालस्य सहपाठिनः
5. क. बालः
6. ख. कोऽपि
7. ग. क्रीडितुम्
8. क. द्वितीया
9. क. बालाय
10. ख. बालकः
11. ग. वराकाः
12. घ. उद्यानम्
13. घ. बालाय
14. ग. गत्वा
15. क. गच्छन्तम्
16. ख. भ्रमरम्
17. ख. बहुवचनम्
18. क. पक्षिणः
19. घ. बालः
20. ग. करोमि
21. ख. कुक्कुरः
22. ख. भग्नमनोरथः
23. क. न + उपगच्छन्ति
24. ग. सर्वैः
25. ख. कालक्षेपम्
26. ख. इत्थम्
27. ग. पाठशालाम्
28. क. विद्याव्यसनी
29. ग. अलभत
30. ख. सम्पदम्
31. घ. श्वानम्
32. क. मधुकरः
33. घ. चटकम्

## अतिलघूत्तरीयाः प्रश्नाः -

**एकपदेन उत्तरत-**

1. कः तन्द्रालुः भवति ?
2. बालकः कुत्र व्रजन्तं मधुकरम् अपश्यत् ?
3. के मधुसङ्ग्रहव्यग्राः अभवन् ?
4. चटकः कया तृणशलाकादिकम् आददाति?
5. चटकः कस्य शाखायां नीडं रचयति ?
6. बालकः कीदृशं श्वानं पश्यति?
7. श्वानः कीदृशे दिवसे पर्यटति ?
8. \`उपाध्यायस्य मुखं द्रष्टुं नैव इच्छामि' अत्र \`आचार्यस्य' इति पदस्य पर्यायः कः?
9. बालः कुत्र भ्रमन्तम् एकं मधुकरम् अपश्यत्?
10. चटकपोतः कस्मिन् कार्ये व्यग्रः आसीत्?
11. बालः पलायमानं कम् अवलोकयत्?
12. बालः क्रीडासहायं कं पश्यति?
13. 'रात्रौ' इत्यस्य विलोमपदं किम्?
14. कुक्कुरं पुत्रप्रीत्या कः पोषयति?
15. \`विचिन्त्य' पदे कः प्रत्ययः वर्तते?

## अतिलघूत्तरीय-प्रश्नानाम् उत्तराणि

1. बालः
2. पुष्पोद्याने
3. मधुकराः
4. चञ्च्वा
5. वटद्रुमस्य
6. पलायमानम्
7. निदाघदिवसे
8. उपाध्यायस्य
9. पुष्पोद्याने
10. नीडकार्ये
11. श्वानम्
12. कुक्कुरम्
13. दिवसे
14. स्वामी
15. ल्यप्

## लघूत्तरीयाः प्रश्नाः

1. बालः कदा क्रीडितुम् अगच्छत् ?
2. बालस्य मित्राणि किमर्थं त्वरमाणा अभवन्?
3. मधुकरः बालकस्य आह्वानं केन कारणेन तिरस्कृतवान्?
4. बालकः कीदृशं चटकम् अपश्यत्?
5. बालकः चटकाय क्रीडनार्थं कीदृशं लोभं दत्तवान् ?
6. खिन्नः बालकः श्वानं किम् अकथयत् ?
7. भग्नमनोरथः बालः किम् अचिन्तयत् ?

**स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**

8. <u>स्वादूनि</u> भक्ष्यकवलानि ते दास्यमि।
9. चटकः <u>स्वकर्मणि</u> व्यग्रः आसीत्।
10. कुक्कुरः <u>मानुषाणां</u> मित्रम् अस्ति।
11. स महतीं <u>वैदुषीं</u> लब्धवान्।
12. <u>रक्षानियोगकरणात्</u> मया न भ्रष्टव्यम् इति ।
13. <u>खिन्नः</u> बालकः श्वानम् अकथयत्।
14. बालः <u>पाठशालागमनवेलायां</u> क्रीडितुम् अगच्छत्।
15. पक्षिणः <u>मानुषेषु</u> न उपगच्छन्ति।

## अतिलघूत्तरीय-प्रश्नानाम् उत्तराणि

1. बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्।
2. बालस्य मित्राणि विद्यालयगमनार्थं त्वरमाणा अभवन्।
3. मधुकरः बालकस्य आह्वानं तिरस्कृतवान् यतः सः मधुसङ्ग्रहे व्यग्रः आसीत्।
4. बालकः चञ्च्वा तृणशलाकादिकम् आददानं चटकम् अपश्यत्।
5. बालकः चटकाय स्वादूनि भक्ष्यकवलानि दानस्य लोभं दत्तवान्।
6. खिन्नः बालकः श्वानम् अकथयत् - "रे मानुषाणां मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे? इदं प्रच्छायशीतलं तरुमूलम् आश्रयस्व। अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामीति।"
7. भग्नमनोरथः बालः अचिन्तयत्- 'अस्मिन् जगति प्रत्येकं स्व-स्वकृत्ये निमग्नः भवति। कोऽपि अहमिव वृथा कालक्षेपं न सहते। अतः अहमपि स्वोचितं करोमि।

**प्रश्ननिर्माणम्-**

8. <u>**कीदृशानि**</u> भक्ष्यकवलानि ते दास्यामि ?
9. चटकः <u>**कस्मिन्**</u> व्यग्रः आसीत्?
10. कुक्कुरः <u>**केषां**</u> मित्रम् अस्ति ?
11. सः <u>**कां**</u> लब्धवान् ?
12. <u>**कस्मात्**</u> मया न भ्रष्टव्यम् इति ?
13. <u>**कीदृशः**</u> बालकः श्वानम् अकथयत् ?
14. बालः <u>**कदा**</u> क्रीडितुम् अगच्छत् ?
15. पक्षिणः <u>**केषु**</u> न उपगच्छन्ति?

## दीर्घोत्तरीय-प्रश्नाः

1. **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

"स्वच्छ-पर्यावरणम् अस्माकं जीवनस्य आधारशिला वर्तते। आधुनिके औद्योगिके युगे प्रदूषणस्य समस्या दिनं प्रतिदिनं वर्धते एव। कुत्रापि स्वच्छवायुः न प्राप्यते, न स्वच्छं जलं लभ्यते न च स्वच्छानि खाद्यपदार्थानि प्राप्यन्ते। अद्यत्वे यन्त्रालयानां यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। दूषितः वायुः एव श्वासेन हृदये प्रविशति। अतः विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः, नेत्ररोगाः च जनान् पीडयन्ति। वायुप्रदूषणस्य प्रमुखतमं कारणम् औद्योगिकविकासः अस्ति। वृक्षाणां विनाशं कृत्वा जनाः औद्योगिकक्षेत्राणां विकासं तु कुर्वन्ति किन्तु ते प्रकृतिदेवीमपि सम्पीडयन्ति। विज्ञानस्य प्रगत्या नित्यं नूतनयन्त्राणामपि आविष्कारः भवति। अतः अस्माभिः सर्वैः मिलित्वा प्रदूषणसमस्यायाः समाधानं कर्तव्यम्।"

**I. एकपदेन उत्तरत-**

(i) दूषितः वायुः कथं हृदये प्रविशति ?

(ii) अस्माभिः कस्याः समाधानं कर्तव्यम् ?

**II. पूर्णवाक्येन उत्तरत-**

(i) वायुप्रदूषणेन के के रोगाः भवन्ति ?

(ii) जनाः केन प्रकारेण प्रकृतिदेवीं सम्पीडयन्ति?

**III. भाषिककार्यम्-**

(i) 'दुःखीकुर्वन्ति' अस्य पदस्य अनुच्छेदे कः पर्यायः ?

(ii) 'मलिनम्' अस्य किं विपर्ययपदं प्रयुक्तम् ?

(iii) 'प्राप्यन्ते' इति क्रियायाः कर्तृपदं किम् ?

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत ।**

2. **भवान् सोमेशः। राँचीनगरम् अध्ययनार्थम् आगतः । स्वविद्यालयस्य वर्णनं कुर्वन् पटनानगरस्थितं मित्रं हिमांशुं प्रति लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत-**

राँचीनगरतः

पतञ्जलिसदनम्

दिनाङ्कः-----------------

प्रियमित्र (i)-----------------

सप्रेम (ii)---------------------

वयं सकुशलं राँचीनगरं प्राप्ताः । अत्र मया गृहस्य (iii)--------------------एव विद्यापतिपब्लिकविद्यालये प्रवेशः लब्धः । अस्मिन् विद्यालये शिक्षायाः माध्यमं तु (iv)-------------------- अस्ति तथापि संस्कृतपाठनस्य अपि (v)--------------------अस्ति। अतिविशालः अयं विद्यालयः । अस्य विद्यालयस्य एकं तरणतालं तथा च पाठ्येतरक्रियाणाम् (vi)-------------------कार्यशालाः सन्ति। अत्रत्याः अध्यापकाः सुयोग्याः स्नेहशीलाः च सन्ति । (vii)--------------------- अपि अति विनम्रः कर्मठः च । अहम् अत्र (viii)----------------------लब्ध्वा अति गौरवम् अनुभवामि । गृहे सर्वेभ्यः मम (ix)-------------प्रणामाः।

तव अभिन्नहृदयः

(x)----------------------

**मञ्जूषा**

(समीपे, सुव्यवस्था, यथोचितम्, प्रधानाचार्यः, सोमेशः, नमोनमः, हिमांशो, आङ्ग्लभाषा, प्रशिक्षणार्थम्, प्रवेशम्)

3. **चित्रं दृष्ट्वा प्रदत्त-मञ्जूषा-सहायतया संस्कृतभाषायां पञ्च-वाक्यानि लिखन्तु-**



**मञ्जूषा**

| |
|---|
| हरीतिमा, अस्ति, मालाकारः, वृक्षाः, उपवनम्, सुन्दरं, सिञ्चति, जलम्, फलानि, जलप्रपातः, पुष्पाणि, सन्ति, विकसन्ति |

## दीर्घोत्तरीय-प्रश्नानाम् उत्तराणि

1. अपठित-गद्यांशम्

I. (i) श्वासेन

(ii) प्रदूषणसमस्यायाः

II. (i) वायुप्रदूषणेन विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः नेत्ररोगाः च भवन्ति।

(ii) जनाः वृक्षाणां विनाशेन प्रकृतिदेवीं सम्पीडयन्ति।

III. (i) सम्पीडयन्ति (ii) स्वच्छम् (iii) पदार्थानि

IV. प्रदूषणस्य समस्या ।

2. पत्रम्

| | |
|---|---|
| (i) हिमांशो | (ii) नमोनमः |
| (iii) समीपे | (iv) आंग्लभाषा |
| (v) सुव्यवस्था | (vi) प्रशिक्षणार्थम् |
| (vii) प्रधानाचार्यः | (viii) प्रवेशम् |
| (ix) यथोचितम् | (x) सोमेशः |

3. चित्रं दृष्ट्वा संस्कृते पञ्च-वाक्यानि-

क. इदम् उपवनस्य चित्रम् अस्ति।

ख. चित्रे सर्वत्र हरीतिमा अस्ति।

ग. अत्र एकः मालाकारः अपि वर्तते।

घ. सः पुष्पाणि जलेन सिञ्चति।

ङ. चित्रे एकः जलप्रपातः अपि वर्तते।